**SAN318**

## स्फोटः

व्याकरणशास्त्रस्य प्रतिपाद्यविषयोऽयं स्फोटः। स्फुटविकसने इत्यस्मात् धातोः स्फोटशब्दो निष्पद्यते। अस्य शब्दस्य परिभाषा- स्फुटति विकसति कमलवत्  खिलत्यर्थो अस्मादिति स्फोटः। स्फुटति अभिव्यज्यते अस्मादिति स्फोटः। स्फोटाः अष्टौ सन्ति। जातिस्फोटः, वर्णस्फोटः, पदस्फोटः, वाक्यस्फोटः, वर्णजाति स्फोटः, पदजाति स्फोटः, वाक्यजातिस्फोटः, सखण्डाखण्डत्वेन अष्टौ स्फोटाः। किन्तु वाक्यस्फोट एव मुख्यः लोके अर्थवोधकत्वात्।।इति।।

स्फोटपदार्थ अखण्डो नित्यः, परन्तु मणेः पुष्पादिवत् प्रतिबिम्बतया लौहित्यादिभेदेन अनेके। उक्तञ्च हरिणा "न प्रत्येकं न मिलिता न चैकस्मृतिगोचरा अर्थस्य वाचका वर्णाः, किन्तु स्फोटः स च त्रिधा।"

वाक् चतुर्विधा भवन्ति। पराः, पश्यन्ति, मध्यमा वैखरी च। परा वाणी वाङ्मूलस्थो भवति। पश्यन्ति वाणी नाभीसंस्थिता भवति। मध्यमा हृदिस्था ज्ञेया वैखरी कण्ठदेशगाः। वैखरी मध्यमा नादद्वारा अर्थज्ञानं भवति।  वैखरी पदार्थो वर्तते- विखरतीति वैखरी। वैखरी नादोच्चारणे न परार्थजन्यं ज्ञानं वा परश्रोत्रेण ग्राह्या भवति। अन्यच्च भर्तृहरिणा प्रोक्तम्-

"यथा मणि कृपाणादौ मुखमेकमनेकधा, तथैव ध्वनिषु स्फोट एक एव विभिद्यते"। स्फोटस्तु एक एव लोके अर्थबोधकत्वात् अनेकरूपेण प्रतिविम्बितो भवति। स्फोट एव शाब्दबोधस्य मुख्यार्थविषयो विद्यते। यदि चेद् स्फोट एक एव नित्योऽखण्डश्च कथं शाब्दबोधो सम्भवति इति चेत् नैव 'दशरथ' इति शब्दस्य अन्तिमोऽक्षरमे व वव्यङ्गो भवति। चरमवर्णा एव व्यङ्ग्या। यथा- कम्बुग्रीवादिवत् अर्थबोधो भवति। रामः कृष्णः इत्यादौ बुद्धीन्द्रियानां विषयो भवति। वस्तुतः स्फोटपदार्थो नित्योऽखण्डः। ध्वनिस्तु अनित्यऽखण्डश्चेति निश्चयेन वक्तुं शक्यम्।।

।।इति।।